प्रे॰म॰ स्या द्विसप्तमे च त्रयोदशं मम् ।। चतुर्दशं शिवाये व यमाय दशयं च कम् दद्यात्पुरुषायैव पिंडं षोडशकं खग । अथ सपिण्डीकरणम्
१२ एवं प्रथममासिक त्रिपक्षिक द्विमासिक त्रिमासिक चतुर्म्मासिक पंचमासिक ऊनषाण्मासिक षाण्मासिक सप्तमासिकाष्टमा
सिक नवमासिक दशमासिक एकादशमासिक ऊनाब्दिक आब्दिक अधिमासिक इत्येतानि द्वादशाहपूर्वकमद्दिकपदपेतानि
षोडशश्राद्धानि पूर्वोक्तविधिना कुर्यादेकोद्दिष्टवत् अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षयस्वर्गप्राप्तिकामः अमुकमा
सिकश्राद्धमेभिर्द्रव्यैरहं करिष्ये सर्वमासिकेष्वेतदेव वाक्यम् अथ सपिण्डीकरणश्राद्धेतिकर्त्तव्यता होमेनर्प्यनकाले च विवाहे
पक्षकर्म्मणि गर्भहीनं कुशं कृत्वा पुत्रदाराधनक्षयः श्राद्धं कृत्वा तु यो भुंक्ते रवावस्तंगते द्विजः पातुधानैस्तु तन्मुक्तं न तत्पथाकृतं
भवेत् नाशिषः प्रतिगृह्णीयान्नाम्नं विकरणांस्तथा विकरणेन विना कुर्यात् प्रेतश्राद्धानि षोडश विकरणेन विनान्यत्र तत्त्व्यर्थमनुर
ब्रवीत् प्रेतश्राद्धानि पितृशब्दस्वधानमस्काराशीःप्रार्थनाभिरम्यतां विकरप्रणावरहितानि भवन्ति स्वधास्थाने तवोपतिष्ठतामिति वक्त
व्यं यदुक्तं पात्रालंबोवगाहश्च उल्लुकोल्लेखनादितः प्रथमयोशाने शेषमंत्रतथैव च प्रदक्षिणाविसर्गश्च सीमांतगमनं तथा अष्टादश
पदार्थानि प्रेतश्राद्धे विवर्जयेत् अथ सव्येनताम्बूलमादाय अद्येहामुकगोत्रस्यामुकप्रेतस्य कर्त्तव्यसपिंडिकरणश्राद्धार्थे पितामहा १२
दित्रपसम्बंधिकालकामविश्वेदेवकृत्ये कुशवटोभवान्मया निमंत्रितः इति वैश्वदेविकब्राह्मणानिमंत्र्य अक्रोधनैरिति श्लोकद्वयं पठेत्

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्येन दक्षिणामुखन्तान्मूलमादाय अद्येहामुकगोत्रस्यामुकप्रेतस्य षोडशश्राद्धान्ते गतसपिण्डीकरणश्राद्धे अनेन ताम्बू
लेन प्रेतब्राह्मणत्वेन भवान्मया निमन्त्रितः निमन्त्रितोस्मीति प्रतिवचनम् इति प्रेतब्राह्मणं निमन्त्र्य अक्रोधनैरित्यादि श्लोक
द्वयं श्रावयेत् पुनस्ताम्बूलमादाय अमुकगोत्राणां पुष्पत्पितामहप्रपितामहवृद्धप्रपितामहानां अमुकामुकशर्मणां अद्य
कर्त्तव्यप्रेतसपिण्डीकरणश्राद्धे अनेन ताम्बूलेन पितामहादिब्राह्मणत्वेन भवान्मया निमन्त्रितः इति पितामहादि ब्राह्मणं
निमंत्र्य अक्रोधनैरिति श्रावयेत् अथ पादार्घः सव्येन पादार्घपात्रं सम्पाद्य नमोस्त्वनन्तायेति संपूज्य अद्येह प्रेतपितामही
दिव्रमश्राद्धसंबंधिनो विश्वेदेवाः एष पादार्घो वो नमः ततोपसव्येन अमुकगोत्रामुकप्रेत एषते पादार्घो मया दीयते तवो
पतिष्ठतां ततः सव्येनाचम्य पुनरपसव्येन अमुकगोत्राः अमुकपितामहप्रपितामहवृद्धप्रपितामहाः एष पादार्घस्त्रेधा विभ
ज्य युष्मभ्यं स्वधा ततः सव्येनाचम्य आगतं वः सुस्वागतं इदमासनमास्यतां ततोपसव्येन आगतन्ते सुस्वागतमिदमासन
मास्यतामिति प्रेतब्राह्मणे आसनं दत्वा पुनः सव्येनाचम्य पुनरपसव्येन आगता यूयं सुस्वागतावयमिदमासनमास्यतामि
ति पितामहादिब्राह्मणे ततः सव्येन कुशयवजलान्यादाय अद्येहेत्यादि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वका
क्षयस्वर्गप्राप्तिकामः कालकामविश्वेदेवपूर्वकसपिण्डीकरणश्राद्धमेभिर्ब्राह्मणैरहं करिष्ये अपसव्येन मोटितकुश

त्यागः ततोऽपसव्येनप्रेतब्राह्मणंपृष्ट्वाकर्म्मपात्रंपूरयेत् कर्म्मपात्रमहंपूरयिष्येइतिसव्येनवैश्वदेविकंब्राह्मणंपृष्ट्वासव्ये
नकर्म्मपात्रंपूरयेत् कर्म्मपात्रस्यासनंदत्वाशन्नोदेवीतिजलं मपवित्रेस्थोवैःइतिपवित्रमपवोसीतियवः तिलोसीतितिलान्गं
धपुष्पादिकंतूष्णीम् कर्म्मपात्रेसम्पन्नम् ततकर्म्मपात्रजलेनअपवित्रःपवित्रोवेतिश्राद्धद्रव्यसेचनम ततोपसव्येनअ
ग्निष्वात्तादिमंत्रेणादिग्वधनंकुर्यात् ततःसव्येनयवजलकुशमादायअद्येहप्रेतपितामहादित्रयश्राद्धसंबंधिनोविश्वेदेवा
कालकामनामनःइदंकौशासनंवोनमः ततःयवानादायविश्वान्देवान् अहमावाहयिष्येइतिपृष्ट्वाआवाहयेत्यनुज्ञातः
विश्वेदेवासआगतशृणुतामइतिमंत्रेणावाहनंविधायहस्तार्घंदद्यात् अर्घपात्रस्थंपवित्रंविप्रकरेदत्वायादिव्येतिपठित्वाक्षतकु
शमादायअद्येहामुकप्रेतसपिंडननिमित्तेपितामहादित्रयश्राद्धसंबंधिनोविश्वेदेवाःकालकामनामानःएषहस्तार्घोवोनमः
नमोस्त्वनंतायेतिगंधादिभिःसंपूज्यअमुकप्रेतपितामहादित्रयश्राद्धसंबंधिनोविश्वेदेवाएतानिगंधपुष्पधूपदीपता
म्बूलवासांसिवोनमःततोन्नंपरिविष्यपृथिवीतेपात्रमालभ्य अद्येहामुकप्रेतपितामहादित्रयश्राद्धसंबंधिनोविश्वेदे
वाकालकामनामानःइदमन्नंसोपकरणंवोनमःइतिदेवकार्यंनिर्वर्त्यअपसव्येनमोटितकुशमादायअद्येहामुकगो
त्रामुकप्रेतइदंकौशमासनंमयादीयतेतेनवोपतिष्ठताम् ततआचम्यपुनरपसव्येनमोटितकुशमादायअमुकगोत्राः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५ अमुकपितामहप्रपितामहवृद्धप्रपितामहाः इदं कौशमासनं त्रेधा विभज्य पुष्पमभ्यर्च्य नमः ततस्तिलानादाय अमुकगोत्रा
न् अमुकपितामहप्रपितामहवृद्धप्रपितामहान् आवाहयिष्ये आवाहयेत्यनुज्ञातः उशन्तस्त्वेति मन्त्रद्वयं पठित्वा ति
लान्विकीर्य्य कर्म्मपात्रजलेन हस्तार्घं संपाद्य अथवा प्रेतपितामहादिपात्रचतुष्टये पि शन्नो देवीत्यादि समस्तमन्त्रैर्ह
स्तार्घपात्राणि संपाद्य प्रथमं प्रेतपात्रमादाय वामहस्ते कृत्वा तत्सींपवित्रादिकं प्रेतब्राह्मणाकरे दत्वा या दिव्येति पठित्वा अ
मुकगोत्रामुकप्रेत एष हस्तार्घो मया दीयते तवोपतिष्ठताम् इति चतुर्थ्यान्तं जलं दत्वा प्रेतार्घपात्रस्यावशिष्टजलभागत्रयं कृ
त्वा पृथक् पितामहादिपात्रत्रये एभिर्म्मन्त्रैर्मेलयेत् येसमानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु
कल्पताम् येसमानाः समनसो जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः ततः पात्रमालभ्य
जपति संसृजतु त्वा पृथिवी वायुरग्निः प्रजापतिः संसृजन्तु पूर्वेभिस्त्रिभिः पितृभिः सह समानी व आकूतिः समाना हृदयानि वः समा
नमस्तु वो मनो यथा वः सुसहासति संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् देवा भागं यथा पूर्वे संजानाना उपासते ए
वो नुगतः प्रेतः पितरस्तं ददामि वः शिवमस्त्विति लोकानां संजानाना उपासते एष वो नुगतः प्रेतः पितरस्तं ददामि वः शिव
मस्त्विति शेषाणां जायतां चिरजीविनः इति प्रेतार्घपात्रस्थं जलं पितामहादिपात्रत्रये प्रत्येकं मेलयित्वा पितामहार्घपात्रं
मादाय पवित्रच्छिन्नकरे दत्वा या दिव्या इति पठित्वा मोटिकं कुशमादाय अद्येहामुकगोत्रास्मत्पितामह एष हस्तार्घस्तुभ्यं स्वधा एवं प्रपिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रे॰ मं॰ महवृद्धप्रपितामहयोरपिहस्तार्घंदद्यात् प्रेतहस्तार्घपात्रंप्रेतवामभागेन्युब्जीकृत्यप्रेतायंस्थानमसीतितदुपरिकुशानिक्षिप्य
१५ ततआचम्यअपसव्येनप्रथमेपात्रेसंस्रवान्समवनीयपितृभ्यःस्थानमसीतिपितामहद्विजवामभागेन्युब्जीकृत्यातदु।
परिकुशाम्प्रयन्निदध्यात्पितृषदनमसीतिततोऽर्घदानम् गंधपुष्पादिभिःप्रेतब्राह्मणंसंपूज्यमोटितकुशमादाय।
अमुकगोत्रामुकप्रेतअमुकशर्म्मन्निदमर्घंतेमयादीयतेतवोपतिष्ठताम् ततोगंधादिभिःपितामहादिब्राह्मणांसंपूज्यमो
टितकुशमादाय अमुकगोत्राःअस्मत्पितामहप्रपितामहवृद्धप्रपितामहाःअमुकामुकशर्माणःइदमर्घंमत्रेधाविभज्यपृथ्व
भ्यःस्वधाततोमंडलंविधायतदुपरिपात्रावलिंदत्वान्नंपरिविष्यपृथिवीतेपात्रमितिपठित्वाङ्गुष्ठावगाहनंकृत्वाअद्येहामु
कगोत्राकुप्रेतइदमन्नंसोपकरणंमयादीयतेतवोपतिष्ठताम् ततः पितामहादिपात्रेअन्नपरिविष्यपृथिवीतेतिपठि
त्वांगुष्ठावगाहनंकृत्वापार्वणवत्पितामहादिभ्योविश्वेदे वपूर्वकमंचसंकल्पविश्वेदेवासकल्पविश्वेदेवततः सव्ये
नपितामहादिभयश्राद्धसंबधिनोविश्वेदेवाः इदमेयोशानंवोननमः अमुकगोत्रामुकप्रेतइदमयोशानंमयादीयतेतवो
पतिष्ठताम् ततइदमयोशानंपितृभ्यःस्वधाइत्ययोशानंदत्वाएरुषसूक्तंजप्त्वाप्रेतद्विजसमीपेअग्निदग्धेत्यन्नंविकीर्यत एम॰
तः सव्येनाचम्यापुनर्गायत्रीमधुवातादिजप्त्वातृप्तान्ज्ञात्वानृप्तास्थेतिपितामहादिब्राह्मणान्पृष्ट्वाशेषमन्नंविकार्न १५
व्यमिष्टैः सहभुज्यताम् इतिशेषमन्नमनुज्ञाप्यपिंडस्थाने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेपयेत् तदुपरिरेखामयतेतिमन्त्रेणाकृत्वाकुशानास्तीर्य्य अमुकगोत्रामुकप्रेतइदंपिण्डासनावनेजनजलंमया।
दीयतेतवोपतिष्ठताम् ततः पितामहादिपिण्डस्थानेवनेजनंदद्यात् ततः अमुकगोत्रामुकप्रेतएषपिण्डोमयादीय।
तेतवोपतिष्ठताम् ततआचम्यअमुकगोत्रामुकपितामहएषपिण्डः अक्षय्यतृप्तिहेतोस्तुभ्यंस्वधा एवंप्रपितामहवृ
द्धप्रपितामहयोः ततः आचम्यप्रेतचिन्तनं विधायतूष्णीमपत्राणिप्रेतपिण्डोपरिक्षिपेत् ततः आचम्यअत्रपितरोमा
दयध्वंयथाभागमावृषायध्वमित्युदङ्मुखः पितॄन्चिंतयेत् पुनर्दक्षिणामुखेनामामदन्तपितरोयथाभागमवृषायिष
तेतिमयादीयतेतवोपतिष्ठताम् ततआचम्यअमुकगोत्रामुकपितामहइदंपिण्डमत्रावनेजलंतुभ्यंस्वधा एवंप्रपि।
तामहवृद्धप्रपितामहयोः ततोनीवीविस्रंसनम् ततोनमस्तेप्रेतरसायेतिप्रेतपिंडार्च्चनंविधायसूत्रंदत्वाअमुकगो
त्रामुकप्रेतइदंपिंडार्च्चनंमयादीयतेतवोपतिष्ठताम् पुनराचम्यनमोवःपितरोरसायेतिपठित्वापिंडोपरिसूत्रंदत्वा अ
मुकगोत्राः अमुकपितामहप्रपितामहवृद्धप्रपितामहाः इदंपिण्डार्च्चनंत्रेधाविभज्ययुष्मभ्यंस्वधा ततोहिरण्यरजत
कुशान्यतरैः प्रेतपिण्डंत्रिधाकृत्वायेसमानाइतिद्वाभ्यांमन्त्राभ्यांपितामहादिपिंडेमेलयेत् ततोगंधादिभिःपिंडमभ्यर्च्य
येत् ततः सव्येनसुप्रोक्षितादिकंपठित्वावैश्वदेविकेपुनरपसव्येनपितामहादिब्राह्मणानांसुप्रोक्षितमस्त्वापाद्येणावनत् न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोमूर्द्धाभिषेकः अस्मत्काले दीर्घमायुरस्तु शांतिरस्त्विति कुशेन जलसहितेन मूर्द्धानमभिषिञ्चेत् ततोऽमुकगोत्र

स्यामुकप्रेतस्यात्र श्राद्धे दत्तमन्नमुदकमक्षय्यमुपतिष्ठताम् ततोऽमुकगोत्रस्यामुकपितामहस्यात्र श्राद्धे दत्तमन्नमुदकमक्षय्यमस्तु एवं प्रपितामहवृद्धप्रपितामहयोरपि दद्यात् ततः सव्येनाघोराः पितरः संतु गोत्रन्नो वर्द्धतामित्याशिषः प्रतिगृह्य ततः स्वधां वाचयिष्ये अमुकगोत्रायामुकप्रेताय स्वधोच्यतामस्तु स्वधा अमुकगोत्रायामुकपितामहाय स्वधोच्यतामस्तु स्वधा एवं प्रपितामहावृद्धप्रपितामहाभ्यां दद्यात् ततः ऊर्जदानं ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन् ऊर्जं दत्वा पिंडाः संपन्नाः पिंडमुत्थापयामि पिंडानुत्थाप्य शंखेन शंखचक्रांकितेन तदुपरि गायत्र्यां पितृरूपेणोनिस्थापयेत् पूजनं च विधाय अर्घपात्रमुत्थापनं कृत्वा दक्षिणां दद्यात् अद्येह कृतैतत्सपिंडनश्राद्धांगभूत काम विश्वेदेवश्राद्धप्रतिष्ठासिद्ध्यर्थं हिरण्यं यथानामगोत्राय ब्राह्मणाय दातुमहं समुत्सृज्ये ततोऽपसव्येन अमुकगोत्राणाममुकपितृपितामह प्रपितामहानां कृतैतत्सपिंडीकरणश्राद्धप्रतिष्ठासिध्यर्थं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहं समुत्सृज्ये सव्येन विश्वेदेवा वाजेवाजेवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः आ मा वाजस्य प्रसवो जगम्यादेमे द्यावा

CC-0. In Public Domain. Digitization by eGangotri

पृथिवी विश्वरूपे आमागन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात् कर्म्मयात्रोदकेन मदक्षिणीकृत्याच मेत् अत्र
श्राद्धे यत्कृतं तेन तत्सुकृतं मस्तु यन्नकृतं तेन सर्वं ब्राह्मणवचनात्परिपूर्णा मस्तु इति प्रेत मंजरी समाप्त॥ ॐ ॥श्रीगणेशाय
नमः अथ पंचक शांतिः साच एकादशेन्हि एकादशाहकृत्यार्वाक्कर्तव्या अथ प्रयोगः आचमनं प्राणानायम्य॰
देशकालौ स्मृत्वाऽमुकतिथौ अयसव्य अमुकगोत्रस्यामुकप्रेतस्य धनिष्ठादि पंचक मरणसूचित वंशारिष्टनिरासा
र्थे सव्यपद्या शास्त्यानच्छांति महं करिष्ये॰ इति संकल्प्यः आचार्यब्रह्मारित्विजान् वरणरीत्या वृणुयात्॰ ततः पुगीफ
लं हस्ताभ्यां आदाय॰ अस्य यागस्य निष्पत्तिर्भवन्तोभ्यर्थिता मया॰ सुप्रसादं प्रकर्तव्यं शांतिकं विधिपूर्वकम्॰ इति पठि
त्वा॰ पूगीफलं ब्राह्मणानामग्रे निधाय॰ होमस्थंडिले कुशकंडिकाकार्या॰ अथ चरुसहणं॰ वसुभ्यस्त्वा जुष्टं निर्वपा
मि॰ वरुणाय त्वा जुष्टं निर्वपामि॰ अजैकपदे त्वा जुष्टं निर्वपामि॰ अहिर्बुध्न्याय त्वा जुष्टं निर्वपामी॰ पूष्णे त्वा जुष्टं निर्व
मि॰ द्विः तूष्णीं॰ एवं अधिश्रित्य॰ ततः स्थंडिलादेशान्यां दिशि स्थंडिलांतरे व स्त्रमास्तीर्य॰ तदुपरि अक्षतपुंजेषु उदक
संस्थ पंचकलशस्थापनमुक्त विधिना॰ तदग्रेऽक्षतपुंजेषु उदक संस्थ पंचपूगीफलस्थापनं॰ तेषु पूगीफलेषु धनिष्ठ
याावाहनादिकं कुर्यात्॰ पश्चात्संरक्तनकलशोपरी सुवर्णप्रतिमां प्रत्येकं निधाय॰ यथाविधिनावाहनादिकं कुर्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्यथा धनिष्ठांआवाहयामिस्थापयामि॰शतभिषजंआवाहयामिस्थापयामि॰ पूर्वाभाद्रपदंआवाहयामिस्थापयामि॰
उत्तराभाद्रपदंआवाहयामिस्थापयामि॰रेवतीआवाहयामिस्थापयामि॰ ततः कलशस्थदेवानांआवाहनम्॰वसवइहा
गच्छतइहतिष्ठत॰इतिवसूनावाह्य॰ततोद्वितीयकलशे॰वरुणइहागच्छइहतिष्ठ॰तृतीयकलशेअजैकपात इहा
गच्छइहतिष्ठ॰चतुर्थकलशेअहिर्बुध्न्यइहागच्छइहतिष्ठ॰पंचमकलशेपूषन्॰इहागच्छइहतिष्ठ॰इत्यावाह्यपंचो
पचारैःपूजयेत्॰ अस्मिन्स्थण्डिलेआवाहितदेवताभ्योनमः इत्युच्चार्यपूजयेत् अग्नेर्वोन्तजयम॰ १०८ त्र्यम्बकेतिमंत्रे
णा अथप्रधान्यहोमश्चरुंग्रहीतेन॰वसुभ्यःस्वाहा॰इदंवसुभ्योनमम॰ वरुणायस्वाहा॰इदंवरुणायनमम॰अजैकपा
देस्वाहा॰इदंअजैकपदेनमम॰ अहिर्बुध्न्यायस्वाहा॰ इदं अहिर्बुध्न्यायनमम॰ पूष्णेस्वाहा॰इदंपूष्णेनमम॰ ततः आवाहि
तदेवानांनाममंत्रैः ऽऽएकैकस्याष्टौष्टावाज्याहुतयोहोतव्याः ततोदधिमध्वाज्यप्लुतिप्रासमित्॰ एकैकस्याष्टाविंशति
अष्टौवायथाशक्त्याहोतव्याः ततः शांत्यर्थंयमादिनाममंत्रैः आज्याहुतयोहोमः यमायस्वाहा॰इदंयमायनमम॰धर्मरा
जायस्वाहा॰इदंधर्मराजायनमम॰मृत्यवे॰ अंतकालाय॰वैवस्वताय॰कालाय॰सर्वभूतक्षयाय॰औदुंबराय॰दा
घ्नाय॰नीलाय॰परमेष्ठिने॰वृकोदराय॰चित्राय॰चित्रगुप्ताय॰शेषंहोमंप्रकृतिवत् होमांते आवाहितदेवतानांपूजे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेप्रार्थनाच॰ अथब्राह्मणभोजनसंकल्पः अद्येत्यादितिथौपंचकमरणशांतिसांगतासिध्यर्थेयथासं पन्नेनान्नेनत्
प्तिपर्यंतेनसदक्षिणेनयथासंख्याकान्ब्राह्मणानहंभोजयिष्ये॰ ततःकांसपात्रस्थसर्षपतैलेमुखंवीक्ष्यसहिरण्यंब्रा
ह्मणायदद्यात्॰ तत्रसंकल्पः इदंसौर्यकांशपात्रंसतैलंसहिरण्यंपंचकमरणजन्यदोषपरिहारार्थंसव्यंअमुकगोत्रायअ
मुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे॰ माषमुद्गयवव्रीहीप्रियंगवादिधान्यानिप्रजापतिदेवतानिब्रह्मविष्णुमहेशे
श्वरूणाप्रीतयेनानानामगोत्रेभ्योब्राह्मणेभ्यस्तुभ्यमहंसंप्रददे॰ ततस्तिलदानं॰ गोदानं॰ सुवर्णदानं॰ ततःकलशदा
नं॰ अद्येत्यादिअपसव्यंअमुकगोत्रस्यप्रेतस्यधनिष्ठादिपंचकमरणजनितदोषपरिहारार्थंसव्येइमानिकलशानिसो
पस्काराणिसदक्षिणानिनानानामगोत्रेभ्योब्राह्मणेभ्यस्तुभ्यमहंसंप्रददे॰ अनेनकलशदानेनवरुणादयःप्रीयन्तां॰ दे
यशींचदद्यात्॰ अद्येत्यादितिथौअपसव्यं॰गोत्रस्यप्रेतस्यपंचकमरणजन्यदोषपरिहारार्थंकृतस्यशांतिकर्मणोवि
धेर्यन्न्यूनमतिरिक्तंतत्सर्वंश्रीविष्णोःप्रसादात्उपविष्टब्राह्मणानांचवचनाच्चसर्वंपरिपूर्णमस्तु॰ अनेनकर्मणाकृतेन
गोत्रस्यप्रेतस्य पंचकमरणसूचितवंशारिष्टनिवृत्तिः उक्तं॰ गरुड॰ सपिंडनदिनेकुर्यात्तस्यशांतिविधिंसुतः॥ एकादशाहा
दिककर्मकरणयोग्यताप्राप्तिः॰ इतिपंचकशांतिः॰ ततोविसर्जनम्॰ ॥ ꣸ ॥ श्रीगणेशायनमः अथपात्रवैकोद्दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रे॰ मं ष्टश्राद्धप्रयोगः तत्र पूर्वदिने कृतनियमः श्राद्धभूमिसंस्कारं कृत्वा वस्त्रोपुगेन कृतस्नानः पञ्चगव्योपलेपनं ज्वलदङ्गा
१८ रभ्रामणादिना वेष्टयित्वा तिलैर्गौरसर्षपैरवकीर्य्य॰ णगौरमृतिकाच्छादनै ॥ ॰पित्रासनस्थानात् वा
मभागे श्राद्धीयवस्तूनि आसाद्य कृतस्नानादिर्मध्याह्ने शुचिः शुक्लद्विवासाः पादौ प्रक्षाल्याचम्य श्राद्धदेशमागच्छेत्
तत्र स्वयं पाकं कुर्य्यात्॰ सपिण्डस्त्रीद्वारा वा पाचयेत् ततः पाके कृते रक्षादीपं विधाय पुनराचम्य प्राङ्मुख उपविशेत्॰
अन्यकृते पाके सिद्धमिति पृष्ट्वा ॐ अपवित्रः पवित्रो वा सर्व्वावस्थां गतोपि वा॰ यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्त
रः शुचिः ॐ पुण्डरीकाक्षः पुनात्विति पठित्वा कुशत्रययजलैः श्राद्धवस्तून्यभिषिञ्चेत् ततः संकल्पः कुशत्रयतिला
जलान्यादाय॰ ॐ अद्याऽमुकमासीयाऽमुकतिथौ अमुकगोत्रस्य पितुरमुकशर्म्मणः साम्वत्सरैकैकोद्दिष्टश्राद्धमहं
करिष्ये इति संकल्पं कुर्य्यात् ततो गायत्रीं त्रिर्जपित्वा तथा च ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च॰ नमः स्वाहायै
स्वधायै नित्यमेव नमो नमः इति त्रिर्जपेत् ततोऽपसव्यं कृत्वा दक्षिणामुखः पातितवामजानुर्मोटकतिलजलान्यादाय॰
आसनं दद्यात्॰ तद्यथा ॐ अद्याऽमुकगोत्र पितरमुकशर्म्मन् साम्वत्सरिकैकोद्दिष्टश्राद्ध इदमासनं ते स्वधेति पूर्वोप
कल्पितं मोटकरूपमासनं तिलजलमोक्षितं दक्षिणाग्रं पितृतीर्थेनोत्सृजेन्नहस्तेन तिलान् गृहीत्वा॰ ॐ अपहता

CC-0. In Public Domain. Digitization by eGangotri

असुरारक्षांसि वेदिषदः इति भोजनपात्रे तिलान्विकीर्य्य॰ ततो जपः ॐ आयन्तु नः पितरः सोम्यासो ऽग्निष्वात्ताः पथि-
भिर्देवयानैः अस्मिन् यज्ञे स्वधया मदन्तो ऽधिब्रुवन्तु ते ऽवन्त्वस्मान्॰ इति जपेत् ततो ऽर्घ्यकरणम् पुटकादौ दक्षिणाग्रं पवित्र-
न्धृत्वा॰ जलङ्गृहीत्वा॰ ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इति जलन्तत्र प्रक्षिप्य॰ ॐ
तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः॰ प्रत्नमद्भिः पृक्तः स्वधया पितॄल्लोकान्प्रीणाहि नः स्वाहा इत्यनेन पित्रार्घ-
पात्रे तिलान् प्रक्षिपेत्॰ गन्धपुष्पे तूष्णीं क्षिपेत् ततो ऽर्घपात्रं वामहस्ते कृत्वा॰ भोजनपात्रे पवित्रन्धृत्वा॰ तदुपरि उदका-
न्तरं दत्वा अर्घं दक्षिणपाणिना गृहीत्वा पठेत् ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थिवीर्याः हि-
रण्यवर्णा यज्ञियास्तान आपः शिवाः शं स्योनाः सुहवा भवन्तु इति पठित्वा॰ ॐ अद्य अमुकगोत्र पितरमुकशर्मन्
साम्वत्सरिकैकोद्दिष्टश्राद्धे एष ते हस्तार्घः स्वधा इति पवित्रोपरि जलं यथापतितमुत्सृजेत् ततः पवित्रपुतं तं दर्भं पात्र-
मवशिष्टजलयुतमेव पित्रासनवामभागे ॐ पितृभ्यः स्थानमसि इति पठन्न्युब्जी कुर्यात्॰ दक्षिणादानपर्यन्तन्तो
ध्दरेत् न चालयेत् ततो गन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवस्त्रादीना पूजनं कुर्यात् पुष्पाञ्जलिं कुर्यात् तद्यथा
मोदकतिलजलपुष्पान्यादाय पठेत् अद्यामुकगोत्र पितरमुकशर्मन् साम्वत्सरिकैकोद्दिष्टश्राद्धे एतानि गन्धपुष्प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूपदीपताम्बूलयज्ञोपवीतवासांसितेस्वधा॰ इतिगंधादीन्दद्यात् ततोजलेनभोजनपात्रासनयोश्चतुर्दिशंमण्डलं
कृत्वा॰ सव्यञ्जनेसघृततिलमन्नेकिञ्चिदग्रभागमुध्धृत्यमोदकादिना॰ ॐ इदमन्नमेतद्भूस्वामिपितृभ्योनमः इति
भूस्वामिभ्योऽन्नन्दद्यात् ततः सिध्दमुत्तममन्नंरजतादिपात्रस्थङ्कराभ्यामादाय॰ पितॄन्ध्यायन्॰ मन्दम्मन्दंपरिवेषणंकु
र्य्यात् ततः तदेवपुरुषाहारसममन्नेपरिवेष्ययथासम्भवव्यञ्जनञ्चलंघृतञ्चापात्रान्तरस्थन्तत्रोपनीय॰ असिध्दमा
नन्वातत्रोपनीय॰ तदन्नम्मधुनाभिधार्य्य॰ वक्ष्यमाणंपठेत्॰ ॐ मधुवाताऋतायतेमधुक्षरन्तिसिन्धवः माध्वीर्न्नः सन्त्वो
षधीः मधुनक्तमुतोषसोमधुमत्पार्थिवं रजः मधुद्यौरस्तुनः पितामधुमान्नोवनस्पतिर्म्मधुमां अस्तुसूर्य्यः माध्वीर्गावोभ
वन्तुनः ॐ मधुमधुमध्वितिचपठित्वापात्रमालभेत् ॰ ततःसव्येनवामेनहस्तेनपात्रेपश्चिमभागेस्पृशन्तदुपरिगतद
क्षिणहस्तेनअधोमुखेनपूर्वभागपात्रंस्पृशन्॰ वक्ष्यमाणंपठेत्॰ ॐ पृथिवीतेपात्रन्द्यौरपिधानम्ब्राह्मणस्यमुखेअमृते
अमृतञ्जुहोमिस्वाहा॰ ॐ इदम्विष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरेस्वाहा॰ ॐ कृष्णकव्यमिदंरक्षमदी
यम्॰ इतिपठित्वा॰ वामेनपाणिनापात्रंस्पृशन्नेवदक्षिणपाणिमुद्धृत्य॰ ॐ इदमन्नं ॐ इमाआपः ॐ इदमाज्यं ॐ इदंहा १९
विः॰ इतिपठन् अन्तेघृतेजलेऽन्नेचाङ्गुष्ठन्निक्षिप्य॰ वक्ष्यमाणंपठन् ॐ अपहताअसुरारक्षांसिवेदिषदः॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति अन्नोपरि तिलान् विकीर्य॰ मोदकतिलजलान्यादाय ॐ अद्य अमुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्रा
द्धे एतत्तेऽन्नं सोपकरणं स्वधा इति उत्सृजेत्॰ ततो वामहस्तमपसृज्य॰ सव्येनाचम्य॰ वक्ष्यमाणं पठेत् ॐ अन्नहीनं
क्रियाहीनं विधिहीनं च यद्भवेत्॰ तत्सर्वमच्छिद्रमस्तु हरेर्नामानुकीर्तनात्॰ इति जपित्वा गायत्रीं त्रिर्जपित्वा॰ तथा
ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः मधु द्यौरस्तु नः
पिता मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॐ मधु मधु मधु॰ इति च जपेत्॰ तथा॰ ॐ कृणुष्व पाजः
प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः तव भ्रमास आशुया प
तन्त्यनुस्पृश धृषता शोशुचानः तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः प्रति स्पशो विसृज तूर्णितमो भ
वा पायुर्विशो अस्या अदब्धः यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ २
ओषतात्तिग्महेते यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्या
न्यग्ने अवस्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् इति रक्षोघ्नीः सूक्तं पठेत् अन्यानि पुरुषसूक्तादीनि जपेत्॰
अन्यानि पवित्राणि पुराणेतिहासस्तोत्रादीनि जपेत् तथा ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे नमः पिनाकहस्ताय वज्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रा॰ध
२०

हस्तापवैनमः ततोऽपसव्येन॰ उच्छिष्टसमीपे दक्षिणाग्रकुशत्रयमास्तीर्य जले मिलित्वा किञ्चिदन्नं सयवतिलञ्जलसिक्तमादा
य॰ ॐ अनग्निदग्धा ये जीवा ये प्यदग्धाः कुले मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु पराङ्गतिम् इति मन्त्रस्य फलमुद्दिश्य कुशोप
रि अन्नं विकिरेत् ततः सव्येनाचम्य हरिं स्मृत्वा गायत्रीं जपित्वा ततोऽपसव्यं कृत्वा हस्तमात्रं चतुरस्रं चतुरङ्गुलोच्छ्रितं तत
दक्षिणाप्लवपिण्डिकायां प्रादेशमात्रेमादाय दर्भपिञ्जल्या दक्षिणाङ्गुष्ठतर्जनीधृतमूलेन वामाङ्गुष्ठतर्ज्जनीधृतोपरि
मागया॰ ॐ अपहता असुरा रक्षांसि वेदिषदः इति पठन् प्रादेशमुल्लिख्य दर्भपिञ्जलीमुत्तरस्यां त्यजेत् ततो वेदिकाप
मङ्गारस्त्रमराम ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति पराऽपुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदा
त्यस्मान्॰ इत्यङ्गारस्त्रमपित्वा॰ अङ्गारं दक्षिणस्यां क्षिपेत्॰ ततस्तत्र छिन्नमूलकुशत्रयमास्तीर्य॰ सव्येनाचम्य॰ पठ
ते ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः इति त्रिर्जपेत्॰ ततोऽपसव्यं कृ
त्वा जलतिलगन्धपुष्पाणि पुटके कृत्वा॰ पुटकं वामहस्ते कृत्वा दक्षिणहस्तेन मोटकतिलजलान्यादाय॰ ॐ अद्यामु
कगोत्रपितरमुकशर्मन् साम्वत्सरिकैकोद्दिष्टश्राद्धपिण्डस्थाने अवनेनिक्ष्व ते स्वधा॰ इति छिन्नमूलकुशोपरि अवने
जनं दद्यात्॰ किञ्चिज्जलं पुटके अवशेषयेत्॰ तत्पुटकं प्रत्यवनेजनार्थं वै पुनरभागे स्थापयेत्॰ ततः तिलजलव्यञ्जनह्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तमिश्रैरन्नैः पिण्डम्बिल्वोपमन्निर्माय मधुघृताभ्यमभिधार्य्य॰ मोटकतिलजलसहितं मादायापसव्यो यगृहीत दक्षिणाहस्तेन
ॐ अद्यामुकगोत्रपितरमुकशर्मन् साम्वत्सरिकैकोद्दिष्टश्राद्ध एष ते पिण्डः स्वधा॰ इति छिन्नमूलकुशोपरि पिण्डन्दद्यात् ततः
कुशमूले तस्मीं करं मोह्य हस्तौ संप्रक्षाल्य सव्येन द्विराचम्य॰ हरिं स्मृत्वा॰ पुनरपसव्यं कृत्वा दक्षिणाभिमुखः पठेत् ॐ अत्र पितृ
र्मादायस्व यथाभागमावृषायस्व इति पठित्वा॰ उत्तराभिमुखीभूयस्वासन्नियम्य पितरं ध्यायन् पुनर्दक्षिणाभिमुखो भवन् पठे
त् ॐ अमीमदन्त पिता यथाभागमावृषायिष्ट॰ इति पठेत्॰ ततः प्रत्यवनेजनदानम्॰ पूर्वं दत्तावशिष्टजलपूर्णमवनेजनपात्र
मादाय दक्षिणाहस्ते कृत्वा॰ ॐ अद्यामुकगोत्रपितरमुकशर्मन् साम्वत्सरिकैकोद्दिष्टश्राद्धपिण्डे अत्र प्रत्यवनेनिक्ष्व ते स्वधा॰
इति पिण्डोपरि प्रत्यवनेजनन्दद्यात् ततो नीव्वीविश्रंस्य॰ सव्येनाचम्य॰ हरिं स्मृत्वा॰ पुनरपसव्यं कृत्वा सूत्रदानम्॰ वामेन
पाणिना सूत्रमादाय दक्षिणाकरे कृत्वा॰ ॐ नमस्ते पितरसाय नमस्ते पितः शोषिय नमस्ते पितर्जीवाय नमस्ते पितरः स्वधायै
नमस्ते पितर्घोराय नमस्ते पितर्मन्य व्ये नमस्ते पितः पितर नमस्ते गृहान्नः पितर्देहि सतस्ते पितर्देष्म ईति पठित्वा॰ ॐ
एतत्ते पितर्वासः॰ इति पिण्डोपरि सूत्रं वस्त्रं वा दद्यात्॰ सूत्रसंकल्पः॰ ॐ मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितर
मुकशर्मन् साम्वत्सरिकैकोद्दिष्टश्राद्धपिण्डे एतत्ते वासः स्वधा॰ इति सूत्रमुत्सृजेत्॰ ततः पितरमुद्दिश्य पिण्डे तस्मै॰ गन्धपुष्पधू

पदीयताम्पूलानिदद्यात् ततः भोजनपात्रे ॐ शिवा आपः सन्त्विजलम् ॐ सौमनस्यमस्त्विति पुष्पाम् ॐ अक्षतञ्चारिष्टं
चास्तु इति तण्डुलान् भोजनपात्रे क्षिपेत् अत्रैव पितरमुद्दिश्य शय्यासनछत्रचामरोपानहभोजनपानपात्रादीन् गोदानादि
कं च अन्नादिकञ्च दद्यात् ततः अक्षय्योदकदानम् मोटकतिलजलान्यादाय ॐ अद्य अमुकगोत्रस्य पितुरमुकशर्मणः सा
म्वत्सरिकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठताम् इति अक्षय्योदकन्दद्यात् ततः अघोरकथनम् इति अक्षय्या
त् त्रिरभिमुखः ॐ अघोराः पितास्त्विति पिण्डोपरि पूर्वाग्राञ्जलधारान्दद्यात् त्रिराचम्य पूर्वाभिमुखः कृताञ्जलिः सुमना आ
शीः प्रार्थयेत् तद्यथा ॐ गोत्रन्नो वर्द्धताम् ॐ दातारो नोऽभिवर्द्धन्तां वेदाः संततिरेव च श्रद्धा च नो माव्यगमत् बहुदेयञ्च नो अ
स्तु अन्नञ्च नो बहु भवेत् अतिथींश्च लभेमहि याचितारश्च नः सन्तु मा च याचिष्म कञ्चन एताः सत्या आशिषः सन्तु इत्याशिषः
वारद्वयं प्रार्थयेत् अपसव्यं कृत्वा सपवित्रकुशान् दक्षिणाग्रान् पिण्डोपरि धृत्वा ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परि
स्रुतं स्वधा स्थ तर्पयत मे पितॄन् इति मन्त्रेण कुशोपरि दक्षिणाग्रां ऊर्ज्जं जलधारां दद्यात् ततो नम्रो भूप पिण्डमाघ्रायोत्थाप
येत् पिण्डाधारकुशान् उल्मुकञ्च वन्हौ निक्षिप्य हस्ताऽर्घ्यपात्रमुत्तानीकृत्य दक्षिणां दद्यात् तद्यथा मोटकजलतिलान् निरञ्जत
ञ्चादाय ॐ अद्य अमुकगोत्रस्य पितुरमुकशर्मणः कृतैतत्साम्वत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदं रजतञ्च द्दैवतन्त

CC-0. In Public Domain. Digitization by eGangotri

न्मूल्योपकल्पितद्रव्यंयथानामगोत्रायब्राह्मणायदक्षिणांदातुमहमुत्सृजेत् यदिउपस्थितंरजतन्नभवतितदारक्तिका
परिमितंरजतञ्चन्द्रदैवतमित्येवमादिवाक्यंकर्त्तव्यंइदंपदन्नदातव्यमितिशेषः ततः अभिरम्यताम इतिविसर्जनम् ततः
सव्यंकृत्वा ॐदेवताभ्यःपितृभ्यश्चमहायोगिभ्यएवचनमःस्वाहायैस्वधायैनित्यमेवनमोनमइतित्रिर्जपेन्नम् ततःसव्यंकृ
त्वा पाणिभ्यांदीपन्निर्वाप्ययेतहस्तौपादौप्रक्षाल्यसव्यंकृत्वाऽऽचम्यपठेत् ॐप्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुय
त् स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः इतिपठित्वा श्राद्धसंपूर्णताकामोवारम्वारंविष्णुंस्मरेत श्राद्धीयवस्तु
नब्राह्मणायप्रतिपादयेत् अम्भसिवाक्षिपेत् ब्राह्मणान्भोजयित्वा ततःशेषञ्ज्ञातिभिःसहभुञ्जीत एवमेवपितृ
यज्ञादिश्राद्धप्रयोगः इत्येकोद्दिष्टश्राद्धपद्धतिःसमाप्तः ॥ ॥ अथशय्यादानविधिः ॥ विष्णुपुराणोक्तशय्यादा
नेविष्णुसच्चेनसय्यादानादिसर्वविधेयं शुद्धश्राद्धेपूजादि कांचनपुरुषपूजनंततःसंकल्प्य फलवस्त्रसमन्वितंयथा
नामगोत्रायब्राह्मणायकांचनपुरुषंदातुमहमुत्सृजेत् सोपकरणशय्यायैनमः इतित्रिःपूज्य ब्राह्मणायनमः ॐअद्यत
स्मिन् अमुकगोत्रस्यपितुरमुकशर्म्मणःशुद्धश्राद्धेमहीमंडलमहितत्वसमृद्धिविशिष्टराजकुलजन्मबहुगंधर्वोपगी
यमानविमानारोहणदिव्यदेहत्वदृश्यगवरथपानाधिपत्यमहामहींद्रत्वमहेश्वरगमनपूर्वकविविधहर्षभोग्यत्ववर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शार्य्यो
२२

शय्यासमस्तावच्छिन्नवस्त्रशिवेनतंतुमसंख्यावर्षसहास्त्रावच्छिन्नस्वर्गलोकमहितत्वमस्नस्मदेहमाभिधनधान्यसमृ
द्धिमत्वविस्नुलोकवासकामइमांवरशय्यानानाविधोपकरणान्वितांविस्नुदैवतांअमुकगोत्रायाऽमुकशर्म्मणेब्राह्म
णायतुभ्यमहंसंप्रददेततोदक्षिणाचस्वस्तीतिॐअद्यकृतैतद्वरशय्यादानसांगतासिद्ध्यर्थमिदंताम्रखंडमर्कदैवतंयथा
नामगोत्रायामुकसर्म्मणेब्राह्मणापदक्षिणांदातुमहमुत्सृजेत स्वस्तीतिप्रतिवचनंब्राह्मणोवदेत् अथदानधर्मेवस्त्रदानंप्र
जादिॐअद्यामुकगोत्रस्यपितुरमुकशर्म्मणःशुद्धश्राद्धेसोमलोकोपभोगचंद्रसमानरूपैतत्तद्वस्त्रतंतुसमसंख्यावर्षावच्छि
न्नसोमलोकवासकामएतानिकर्पासकौशेयवस्त्राणिबृहस्पतिदैवतानियथानामगोत्रायब्राह्मणायतुभ्यमहंसंप्रददेस्वस्तीति
प्रतिवचनंदक्षिणाच अथपात्रदानेॐअद्यामुकगोत्रस्यपितुरमुकशर्म्मणःशुद्धश्राद्धेचंद्रबिंवसमानकरणकवहुगंधर्वाप्सरोग
णगीयमानइंद्रलोकवासकामएतानिरीतिमयानिभाजनानिविश्वकर्म्मविष्णुदैवतानियथानामगोत्रायब्राह्मणायतुभ्यमहंसंप्र
ददेस्वस्तीतिदक्षिणाचअथछत्रदानेफजादिॐतत्सत्अद्यामुकगोत्रस्यपितुरमुकशर्म्मणःशुद्धश्राद्धेसौवर्णराजतछत्राद्यलंकृतानी
यवहुगणस्थवहुकुंजराणकधर्मराजपुरगमनकामइदंछत्रंउत्तानांगिरोदैवतंअमुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददेस्व
स्तीतिप्रतिवचनंदक्षिणाचअथव्यजनदानेफजादिॐतत्सत्अद्यामुकगोत्रस्यपितुरमुकशर्म्मणःशुद्धश्राद्धेसर्वदुःखाभावकामइदंवेणु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्णुदेवतंयथानामगोत्रायब्राह्मणायतुभ्यमहंसंप्रददेदक्षिणाचस्वस्तीति अथउपानहौछत्रकार्पासोछिपेत् ओंतत्सत् अद्यामुक
गोत्रस्यपितुरमुकशर्म्मणः शुद्धश्राद्धे सर्वकंटकमर्दनबहुविषसंतरबहुरोग्यकम्बनभूषिताश्वतरोपुत्तरथशुभयानाधिपत्या
प्राप्तिवृषभयुक्तशकटदानजन्यसमफलप्राप्तिकामइमेउपानहौ उत्तानांगीरोदेवतेयथानामगोत्रायब्राह्मणायतुभ्यमहंसंप्रददे
दक्षिणाच स्वस्तीतिप्रतिवचनं अथकाष्ठपादुकादानेपुजादि ओंतत्सत् अद्यामुकगोत्रस्यपितुरमुकशर्म्मणःशुद्धश्राद्धेवरवृ
षभसंयुक्तशकटदानजन्यसमफलप्राप्तिकामनाजवाश्वतरीपुत्तरथप्राप्तिकामइमेवरकाष्ठपादुकेविष्णुदैवतेयथानामगो
त्रायब्राह्मणायतुभ्यमहंसंप्रददेदक्षिणाच स्वस्तीति अथकाष्ठमयसिंहासनदानेपूजादि ओंतत्सत् अद्यामुकगोत्रस्यपितुर
मुकशर्म्मणःशुद्धश्राद्धेसर्वपापविनिर्मुक्तदिव्यविमानारोहणचिरकालस्वर्गलोकवासकामइदंकाष्ठसिंहासनंविष्णुदैव
तंयथानामगोत्रायब्राह्मणायतुभ्यमहंसंप्रददेदक्षिणाचस्वस्तीति अथहेमाभरणदाने पूजादि ओंतत्सत् अद्यामुकगोत्र
स्यपितुरमुकशर्म्मणःशुद्धश्राद्धेसर्वसुखित्वचिरकालस्वर्गलोकावस्थानोत्तर सौभाग्यसंयुक्तनलसुरूपीनसकला
धिकरणसर्वगुणोपेतात्मीयजन्यकामइदंहेमाभरणंविष्णुदैवतंअमुकगोत्रायब्राह्मणायतुभ्यमहंसंप्रददेदक्षिणाच
स्वस्तीतिप्रतिवचने अथसुखासनअश्वगजदर्पणतैलघृतमन्नशर्करालवणकर्पासतिलतंडुलसर्ववस्तूयथानामगोत्रा

यवाह्मणायतुभ्यमहंसंप्रददेदक्षिणाचस्वस्तीति अथद्वादशपददान ॐतत्सत् अद्यामुकगोत्रस्यपितुरमुकशर्म्मणःसांवत्सरि
कैकोद्दिष्टशुद्धश्राद्धेअक्षय्यस्वर्गलोकवासप्राप्तिकामोभूरिभोजनार्थमेतानिद्वादशपदानिगंधपुष्पधूपदीपतांबूलयज्ञोप
वितवस्त्रउर्णासनकमंडलुसपवित्राणिरौप्यमुद्रिकापुस्तकदंडअन्नसहितानियथानामगोत्रेभ्योब्राह्मणेभ्योयथाभागवि
भज्यदातुमहमुत्सृजेत् ततोगोदानं तम्दावेतन्निःक्रयद्रव्यंसुवर्णंदद्यात् ततोमंडलादिश्राद्धकर्म्मकुर्य्यात् इतिशय्यादा
नसमाप्तः॥

अथसूचिपत्रः	एकादशाह ३	सपिंडि ६	अथशय्या
षट्पींडप्रथमदिन १	वृषोत्सर्ग ४	पंचरत्नशांति ७	दानविधि
दशगात्रपींड २	षोडशी ५	मासिकश्राध ८	समाप्तः ९

श्रीकाशीविश्वनाथपुरीमेमहल्लाबुल्लानालासुधानेवाशछापाखानेमेरामकुमारमिश्रकेइहां
प्रेतमञ्जरीछापीगई जिसकोलेनाहोयचाननीचौकमेकन्हइयामिश्रकेदुकानपरमिलैगा ॥